# Dvijaproktam Shivarchanopadesham 2

# દ્વિજપ્રોક્તં શિવાર્ચનોપદેશમ્ ૨

## Document Information

Text title : Dvijaproktam Shivarchanopadesham 2

File name : dvijaproktaMshivArchanopadesham2.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 26 kumbhaghoNamahimAnuvarNanam | 419-435||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

Dvijaproktam Shivarchanopadesham 2

# દ્વિજપ્રોક્તં શિવાર્ચનોપદેશમ્ ૨

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

સ સર્વદા પૂજનીયો દેવદેવોત્તમઃ શિવઃ ।
યઃ કાલકાલઃ સર્વજ્ઞઃ સર્વવન્દ્યો મહેશ્વરઃ ॥ ૪૧૯॥

સ સર્વદા પૂજનીયો દેવદેવોત્તમઃ શિવઃ ।
યેનેદં સૃષ્ટમખિલં જગત્સ્થાવરજઙ્ગમમ્ ॥ ૪૨૦॥

સ સર્વદા પૂજનીયો દેવદેવોત્તમઃ શિવઃ ।
યેન સમ્પાલ્યતે નિત્યં સર્વમેતચ્ચરાચરમ્ ॥ ૪૨૧॥

સ સર્વદા પૂજનીયો દેવદેવોત્તમઃ શિવઃ ।
યેનેદં વિશ્વમખિલં ભસ્મસાત્ક્રિયતે ક્ષણાત્ ॥ ૪૨૨॥

સ સર્વદા પૂજનીયો દેવદેવોત્તમઃ શિવઃ ।
યઃ પૂર્ણઃ સચ્ચિદાનન્દઃ સર્વવ્યાપી વિભુઃ પ્રભુઃ ॥ ૪૨૩॥

સ સર્વદા પૂજનીયો દેવદેવોત્તમઃ શિવઃ ।
યો નિર્ગુણોઽપિ સગુણઃ પરમાનન્દવિગ્રહઃ ॥ ૪૨૪॥

સ સર્વદા પૂજનીયો દેવદેવોત્તમઃ શિવઃ ।
યન્નામશ્રવણાદેવ ભુક્તિર્મુક્તિશ્ચ જાયતે ॥ ૪૨૫॥

સ સર્વદા પૂજનીયો દેવદેવોત્તમઃ શિવઃ ।
યત્કથા શ્રવણાત્સદ્યો દગ્ધાઃ સંસારવાસનાઃ ॥ ૪૨૬॥

સ સર્વદા પૂજનીયો દેવદેવોત્તમઃ શિવઃ ।
યમર્ચયન્તિ મુનયો હૃત્પઙ્કજનિવાસિનમ્ ॥ ૪૨૭॥

સ સર્વદા પૂજનીયો દેવદેવોત્તમઃ શિવઃ ।
યદર્ચનેન સર્વૈશ્ચ ગાણપત્યમવાપ્યતે ॥ ૪૨૮॥

સ સર્વદા પૂજનીયો દેવદેવોત્તમઃ શિવઃ ।

યદ્વામાઙ્ગાદભૂદ્વિષ્ણુર્દક્ષિણાઙ્ગાત્પ્રજાપતિઃ ॥ ૪૨૯॥

સ સર્વદા પૂજનીયો દેવદેવોત્તમઃ શિવઃ ।
યમાહુર્નિષ્કલં શાન્તં નિરવદ્યં નિરઞ્જનમ્ ॥ ૪૩૦॥

સ સર્વદા પૂજનીયો દેવદેવોત્તમઃ શિવઃ ।
યમાહુઃ પુરુષં શાન્તં નીલગ્રીવં પિનાકિનમ્ ॥ ૪૩૧॥

સ સર્વદા પૂજનીયો દેવદેવોત્તમઃ શિવઃ ।
યમાહુઃ શ્રીવિરૂપાક્ષમુમાદેહાર્ધધારિણમ્ ॥ ૪૩૨॥

સ સર્વદા પૂજનીયો દેવદેવોત્તમઃ શિવઃ ।
યમાહુઃ કરુણાસિન્ધું ભક્તબન્ધુમુમાપતિમ્ ॥ ૪૩૩॥

સ સર્વદા પૂજનીયો દેવદેવોત્તમઃ શિવઃ ।
યં વિદિત્વાऽમૃતીભૂય ન પુનર્ગર્ભભાઙ્નરઃ ॥ ૪૩૪॥

સ સર્વદા પૂજનીયો દેવદેવોત્તમઃ શિવઃ ॥ ૪૩૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે દ્વિજપ્રોક્તં શિવાર્ચનોપદેશં ૨ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૬ કુમ્ભઘોણમહિમાનુવર્ણનમ્ । ૪૧૯-૪૩૫॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 26 kumbhaghoNamahimAnuvarNa
. 419-435..

Notes:
The Dvija દ્વિજઃ delivers Upadeśa ઉપદેશ about essentiality of worshiping Maheśvara Śiva મહેશ્વર શિવ.

Proofread by Ruma Dewan

*Dvijaproktam Shivarchanopadesham 2*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*